# श्रीसुक्त

## श्रीसुक्त

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१॥

ॐ ताम आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥२॥

ॐ अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ।
श्रियं देवी मुपह्वये श्रीर्मदिवीजुषताम् ॥३॥

ॐ कां सो स्मितां हिरण्यप्राकारा आर्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥४॥

ॐ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे ॥५॥

ॐ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसानुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः ॥६॥

ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोस्मिराष्ट्रेस्मिन् कीर्तिमृद्धिं ददातु मे ॥७॥

ॐ क्षुत्पिपासामलां ज्येष्ठां अलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥८॥

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोप ह्वये श्रियम् ॥९॥

ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥१०॥

ॐ कर्दमेन प्रजाभूता मयि संभव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥११॥

ॐ आपः सृजन्तु स्निग्धानि चिक्लीतवस मे गृहे ।
नि चदेवीं मातरं श्रियं वासय मे कुले ॥१२॥

ॐ आद्रा पुष्करिणी पुष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयी लक्ष्मीं जातवेदो म आवह ॥१३॥

ॐ आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१४॥

ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योश्वान् विन्देयं पुरुषानहम् ॥१५॥

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पञ्चदशर्चंच श्रीकामः सततं जपेत् ॥१६॥

## फलश्रुती

पद्मानने पद्मऊरु पद्माक्षि पद्मसंभवे |
तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहम् ॥

अश्वदायै गोदायै धनदायै महाधने ।
धनं मे लभतां देवि सर्व कामाश्च देहि मे ॥

पद्मानने पद्म विपद्म पत्रे पद्मप्रिये पद्मदलायताक्षी |
विश्वप्रिये विष्णुमनोनुकूले त्वत्पाद पद्मं मयि सन्निधत्स्व ॥

पुत्रपौत्रं धनं धान्यं हस्त्यश्वादिगवेरथम् ।
प्रजानां भवसि माता आयुष्मन्तं करोतु मे॥

धनमग्नि र्धनं वायु र्धनंसूर्यो धनं वसुः ।
धनमिन्द्रो बृहस्पति र्वरुणो धनमश्विना ॥

वैनतेय सोमं पिब सोमं पिबत वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥

न क्रोधो न च मात्स्यर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत ॥

सरसिजनिलये सरोजहस्ते धवलतरां शुकगंधमाल्य शोभे
भगवती हरिवल्लभे मनोज्ञे त्रिभुवन भूतिकारी प्रसीद मह्यम्

विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम् ।
लक्ष्मींप्रियसखीं भूमिं नाम्यअच्युत वल्लभाम् ॥

महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥

श्रीवर्चस्यमायुष्यमारोग्य मा विधात् शोभमानं महीयते ।
धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥

इति श्रीसूक्तं संपूर्णम्